फले इत्यादि। विक्लित्त्यादि फलं प्रति। तिङर्थाः कर्तृकर्मसंख्याकालाः। तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे, संख्या कर्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्म्मणि, समानप्रत्ययोपात्तत्वात्। तथाचाख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्त्तृकर्म्मोपस्थितिर्हेतुरिति कार्य्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो वाच्यः सोऽपि चन्द्र इव मुखं दृश्यते, देवदत्तोभुक्त्वा व्रजतीत्यादौ चन्द्रक्त्वार्थयोः आख्यातार्थानन्वयादितराविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्त्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे। कालस्तु व्यापारे विशेषणम्। तथा हि "वर्त्तमाने लट्" इत्यत्राधिकाराद्धातोरिति लब्धम् तच्च धात्वर्थं वदत्प्राधान्याद्व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। न च संख्यावत् कर्तृकर्मणोरेवान्वयः शङ्क्यः अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः अपाक्षीदित्यनापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्। न चामवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः। परयत्नस्याज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिनावगतौ चायमुत्तिष्ठति शक्त्यभावात् फलन्तु न जायत इति लोकप्रतीतेरिष्टत्वात्। एवञ्च तिङर्थो विशेषणमेव भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति" निरुक्तोक्तेः भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते। अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात् प्रथमान्तस्य प्राधान्यापत्तिः। तथा च पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् प्रथमान्तमृगस्य धावनक्रियाविशिष्टस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवम् अप्रथमासामानाधिकरण्यात् शतृप्रसङ्गः। एवमपि द्वितीयायादुर्व्वारत्वेन पश्य मृगइत्यादिवाक्यस्यैवासम्भवापत्तेः। न च पश्येत्यत्र तमिति कर्म्माध्याहार्य्यम्। वाक्यभेदप्रसङ्गात् उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वात् अध्याहारे अनन्वयापत्तेश्च। एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावोद्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतुः पश्य मृगोधावति, पचति भवतीत्याद्यनुरोधादिति दिक्। इत्थञ्च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना, पच्यते इत्यत्रैकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटोनश्यतीत्यत्रापि घटाभिन्नैकाश्रयकोनाशानुकूलोव्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्। अतएव तस्यां सत्यां नश्यति, तदत्यये नष्टः, तद्भावित्वे नङ्क्ष्यतीति प्रयोगः। देवदत्तोजानातीच्छतीत्यादौ च देवदत्ताभिन्नैकाश्रयकोज्ञानेच्छाद्यनुकूलोवर्त्तमानो व्यापार इति बोधः स चात्मत आश्रयतैवेति रीत्योह्यम्"। एवञ्च वैयाकरणमते सुब्भिन्नत्वे सति संख्याबोधकप्रत्ययत्वमाख्यातत्वमिति लक्षणम् "सुपां कर्म्मादयोऽप्यर्था संख्या चैव तथा तिङामित्युक्तेः यद्यपि आख्यातसामान्यस्य संख्यासामान्यशक्तत्वज्ञापकं सूत्रं नास्ति तथापि लडादेशैकवचनादीनां तत्तत् संख्याशक्तताज्ञापकसूत्रेण आदेशगतं तथात्वं स्थानिनि लकारे कल्पितमिति संख्याबोधनयोग्यत्वमादाय लक्षणसमन्वय इति बोध्यम् "आख्यातमाख्यातेन क्रियासातत्ये" मयूर० गणसूत्रम् तत्र आख्यातपदं च तदन्तपरम् "प्रत्ययग्रहणे तदन्तग्रहणम्। इति नियमात् २आख्यातान्ते च।

**आख्याति** स्त्री आ+ख्या—क्तिन्। कथने।

**आख्यातृ** त्रि० आ+ख्या—तृच्। उपदेशके। "आख्यातोपयोगे" पा०।

**आख्यान** न० आ+ख्या—भावे ल्युट्। १कथने। २पूर्व्ववृत्तकथने "आख्यानं पूर्व्ववृत्तोक्तिः" सा०द०। 'यथा देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० ३प्रतिवचने च। प्रश्नाख्यानयोः" पा० "विभाषाख्यानपरिप्रश्नयोरिञ्"पा०। करणे ल्युट्। ४भेदके धर्मे। "लक्षणेत्थम्भूताख्यानेत्यादि" पा० इत्थंभूतः कञ्चित् प्रकारं प्राप्त आख्यायते अनेन इति व्युत्पत्तेः कञ्चित्प्रकारं प्राप्तस्य भेदकोधर्म्म इति सूत्रार्थः यथा भक्तोविष्णुमभि। ५आर्ष महाकाव्यान्तर्गतसर्गभेदे तेन हि कथाविशेषस्य वर्ण्णनीयचरिताख्यानात्तथात्वम् महाकाव्यं लक्षयित्वा